# अथ संन्यासनिर्णय ।

श्रीकृष्णाय नमः ।

पश्चात्तापनिवृत्त्यर्थं परित्यागो विचार्यते ।
स मार्गद्वितये प्रोक्तो भक्तौ ज्ञाने विशेषतः ॥ १ ॥
कर्ममार्गे न कर्तव्यः सुतरां कलिकालतः ।
अत आदौ भक्तिमार्गे कर्तव्यत्वाद्विचारणा ॥ २ ॥
श्रवणादिप्रवृत्त्यर्थं[1] कर्तव्यत्वेन नेष्यते ।
सहायसंगसाध्यत्वात्साधनानां च रक्षणात् ॥ ३ ॥
अभिमानान्नियोगाच्च तद्धर्मैश्च विरोधतः ।
गृहादेर्बाधकत्वेन साधनार्थं तथा यदि ॥ ४ ॥
अग्रेऽपि तादृशैरेव संगो भवति नान्यथा ।
स्वयं च विषयाक्रांतपाषंडी स्यात्तुकालतः[2] ॥ ५ ॥
विषयाक्रांतदेहानां नावेशः सर्वदा[3] हरेः ।
अतोऽत्र साधने भक्तौ नैव त्यागः सुखावहः ॥६॥
विरहानुभवार्थं तु परित्यागः प्रशस्यते ।
स्वीयबंधनिवृत्त्यर्थं वेषः सोऽत्र न चान्यथा ॥७॥
कौंडिन्यो गोपिकाः प्रोक्ता गुरवः साधनं च तत् ।
भावो भावनया सिद्धः साधनं नान्यदिष्यते ॥८॥

---

१ प्रसिद्ध्यर्थं २ कामतः ३ सर्वथा.

विकलत्वं तथाऽस्वास्थ्यं प्रकृतिः प्राकृतं न हि ।
ज्ञाने[1] गुणाश्च तस्यैवं वर्तमानस्य बाधकाः ॥९॥
सत्यलोके स्थितिर्ज्ञानात्संन्यासेन विशेषितात् ।
भावना साधनं यत्र फलं चापि तथा भवेत् ॥१०॥
तादृशाः[2] सत्यलोकादौ तिष्ठंत्येव न संशयः ।
बहिश्चेत्प्रकटः स्वात्मा वह्निवत्प्रविशेद्यदि ॥११॥
तदैव सकलो बंधो नाशमेति न चान्यथा ।
गुणास्तु संगराहित्याज्जीवनार्थं भवंति हि ॥१२॥
भगवान् फलरूपत्वान्नात्र बाधक इष्यते ।
स्वास्थ्यवाक्यं न कर्तव्यं दयालुर्न विरुध्यते ॥१३॥
दुर्लभोऽयं परित्यागः प्रेम्णा सिध्यति नान्यथा ।
ज्ञानमार्गे तु संन्यासो द्विविधोऽपि विचारितः[3] ॥१४॥
ज्ञानार्थमुत्तरांगं च सिद्धिर्जन्मशतैः परम् ।
ज्ञानं च साधनापेक्षं यज्ञादि श्रवणान्मतम् ॥१५॥
अतः कलौ स संन्यासः पश्चात्तापाय नान्यथा ।
पाषंडित्वं भवेच्चापि तस्माज्ज्ञानेन संन्यसेत् ॥१६॥
सुतरां कलिदोषाणां प्रबलत्वादिति स्थितिः[4] ।
भक्तिमार्गेऽपि चेद्दोषस्तदा किं कार्यमुच्यते ॥१७॥
अत्रारंभे न नाशः स्याद्दृष्टांतस्याप्यभावतः ।
स्वास्थ्यहेतोः परित्यागाद्बाधः केनास्य संभवेत् ॥१८॥

१ ज्ञानं २ तादृशः ३ विचारत. इति पा०. ४ स्थिति स्थितम् इति पा०.

हरिरत्र न शक्नोति कर्तुं बाधां कुतोऽपरे ।
अन्यथा मातरो बालान्न स्तन्यैः पुपुषुः क्वचित् ॥१९॥
ज्ञानिनामपि वाक्येन न भक्तं मोहयिष्यति ।
आत्मप्रदः प्रियश्चापि किमर्थं मोहयिष्यति ॥२०॥
तस्मादुक्तप्रकारेण परित्यागो विधीयताम् ।
अन्यथा भ्रश्यते स्वार्थादिति मे निश्चिता मतिः ॥२१॥
इति कृष्णप्रसादेन वल्लभेन विनिश्चितम् ।
संन्यासवरणं भक्तावन्यथा पतितो भवेत् ॥२२॥

इति श्रीवल्लभाचार्यविरचितः संन्यासनिर्णयः समाप्तः ।

## अथ निरोधलक्षणम् ।

श्रीकृष्णाय नमः ।

यच्च दुःखं यशोदाया नंदादीनां च गोकुले ।
गोपिकानां च यद् दुःखं तद् दुःखं स्यान्मम क्वचित् १
गोकुले गोपिकानां च सर्वेषां व्रजवासिनाम् ।
यत्सुखं समभूत्तन्मे भगवान्किं विधास्यति ॥२॥
उद्धावागमने जात उत्सवः सुमहान्यथा ।
वृंदावने गोकुले वा तथा मे मनसि क्वचित् ॥३॥
महतां कृपया यावद्भगवान् दययिष्यति ।
तावदानंदसंदोहः कीर्त्यमानः सुखाय हि ॥४॥